# केन्द्रीय विद्यालय संगठनम् , लखनऊ संभागः
## KENDRIYA VIDYALAYA SANGATHAN, LUCKNOW
पूर्वबोर्ड परीक्षा **(2025-26)**

**PRE BOARD EXAM (2025-26)**

**कक्षा - दशमी / CLASS-X**

**संस्कृतम् (कोड् -119) SANSKRIT( CODE -119)**

**समयः–होरात्रयम्** **सम्पूर्णाङ्काः - ८०**

**Time allowed -3 Hours** **Total Marks-80**

**सामान्य निर्देशाः**

**1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति ।**

**2. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।**

**3. प्रश्नसंख्या प्रश्नपत्रानुसारम् एव लेखनीया ।**

**4. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृते एव लेखनीयानि ।**

**5. प्रश्नानां निर्देशाः ध्यानेन पठनीयाः ।**

**अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।**

**क खण्डः - अपठित-अवबोधनम् 10 अङ्का:**

**ख खण्डः - रचनात्मकं कार्यम् 15 अङ्का:**

**ग खण्डः - अनुप्रयुक्तं व्याकरणम् 25 अङ्काः**

**घ खण्डः - पठितावबोधनम् 30 अङ्का:**

## खण्ड 'क' अपठितावबोधनम्

**(10 अड़्का)**

**1. अधोलिखितं गद्द्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 10**

एकस्मिन् विद्यालये नवमकक्षायाः छात्रेषु अकिञ्चनः इति नामकः एकः छात्रः आसीत्। कक्षायाः सर्वे छात्रा सम्पन्नपरिवारेभ्यः आसन, परन्तु अकिञ्चनस्य पिता एकस्मिन् कार्यालये चतुर्थ- श्रेण्याः कर्मकर: आसीत्। इतरान् सम्पन्नान् छात्रान् दृष्ट्वा प्रायः अकिञ्चनस्य मनसि हीनभावना प्राविशत्। सः अचिन्तयत् एतेषां सहपाठिनां जीवनं धन्यम् अस्ति। धिक् मम अभावपूर्ण जीवनम् । मम सहपाठिनां जीवनं पर्वतः इव उच्चम् मम च जीवनं धूलिवत् निम्नम्। यदा सः एवं चिन्तयति स्म तदैव वैभवः तम् अवदत् भोः मित्र! अहं त्वतः गणितं पठितुम् इच्छामि। किं त्वम् अदय सायङ्काले मम गृहम् आगन्तुं शक्नोषि ? अकिञ्चनः वैभवस्य आमन्त्रणं स्वीकृत्य सायङ्काले यदा तस्य गृहम् अगच्छत् तदा सः अपश्यत् यत् वैभवस्य गृहे मातापितरौ अनुपस्थितौ आस्ताम्। वैभवः तस्मै असूचयत् यत् रात्रौ विलम्बेन एव तौ गृहम् आगच्छतः। वैभवस्य विषादपूर्ण जीवनं दृष्ट्वा अकिञ्चनः अबोधयत् यत् तस्य गृहे मातापित्रोः अधिकसान्निध्येन तस्य एव जीवनं वरम् न तु वैभवस्य । सत्यमेवास्ति-दूरतः पर्वताः रम्याः इति ।

**अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम)              1x2 = 2**

(i) अकिञ्चनस्य कक्षायाः अन्ये छात्राः कीदृश-परिवारेभ्यः आसन्?

(ii) अकिञ्चनस्य मनसि किम् प्राविशत्?

(iii) दूरतः के रम्याः?

**आ. पूर्णवाक्येन लिखत- (केवलं प्रश्नद्वयम् )        2x2=4**

(i) अकिञ्चनस्य पिता कः आसीत्?

(ii) अकिञ्चनः हीनभावनया किम् अचिन्तयत्?

(iii) अकिञ्चनः यदा वैभवस्य गृहम् अगच्छत् तदा किम् अपश्यत्?

**इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1x1=1**

**ई. यथानिर्देशम् उत्तरत (केवलं प्रश्नत्रयम्)                    1x3=3**

(i) 'सम्पन्नान्' इति पदस्य विशेष्यपदं किम् अस्ति?

(क) छात्रान् (ख) छात्राः (ग) एतेषां (घ) जीवनं

(ii) 'आस्ताम्' इति पदस्य कर्तृपदं किम् अस्ति?

(क) छात्राः (ख) मातापितरौ (ग) पिता(घ) पर्वताः

(iii) 'निकटतः' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(क) प्रायः (ख) पर्वतः (ग) दूरतः (घ) उच्चम्

(iv) 'वैभवः तम् अवदत्' इति वाक्यांशे 'तम्' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) सहपाठिभ्यः (ख) वैभवाय (ग) पर्वतेभ्यः (घ) अकिञ्चनाय

## खण्ड : ख (15 अंकाः)   रचनात्मक लेखनम्

**2. भवती अलका। भवती चेन्नईनगरस्य छात्रावासे वसति। भवती विद्यालयतः शैक्षिक भ्रमणाय शिमलानगरं गन्तुम् इच्छति। एतदर्थं राशिम् अनुमतिम् च प्राप्तुम् नवदिल्लीस्थं पितरं प्रति पत्रं लिखति। मञ्जूषातः पदानि विचित्य रिक्तस्थानानि पूरयित्वा पत्रं च पुनः उत्तरपुस्तिकायां लिखत।      1/2x10=5**

**(मञ्जूषा-** अलका, शिमलानगरम्, पितृमहोदयाः पाठाः, चेन्नईनगरतः, वार्षिकी, मम, गन्तुम्, प्रणामाः, भवता)

छात्रावासः

रङ्गनाथम् विद्यालयः

(i) .........................

तिथि: 20 अप्रैल, 2024

माननीयाः (ii) .............

सादर प्रणामः। भवतः पत्र प्राप्तम्। भवन्तम् सहर्षम् सूचयामि यत् मम (iii) ............. परीक्षा समाप्ता। परीक्षापरिणामः नूनमेव शोभनः भविष्यति यतः भवतः कथनानुसारम् अहम् परिश्रमम् अकरवम्। रात्रिन्दिवम् एकीकृत्य मया (iv)............. पठिताः लिखित्वा च तेषाम् अभ्यासः कृतः। अस्माकम् मानसिक-शारीरिक-श्रान्तिं दूरीकर्तुम् (v) .............. विद्यालयस्य अध्यापिकाः अस्मान् शैक्षिक भ्रमणाय (vi) ............ नेष्यन्ति। अहम् अपि ताभिः सह (vii) ............. इच्छामि। एतदर्थम्

एकसहस्त्रम् रूप्यकाणि दातव्यानि| यदि भवतः अनुमतिः स्यात् तर्हि अहम् अपि गच्छेयम्| अतः कृपया उपर्युक्तां राशिं प्रेषयित्वा माम् अनुगृहीतां कुर्वन्तु | सर्वेभ्यः मम (viii) ............ निवेदनीयाः|
(ix) ............ प्रिया सुता
(x) ............
सविधे
श्री पुरुषोत्तमः
154, रोहिणी
सेक्टर-3 दिल्ली-110085,

3. **अधः प्रदत्तं चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत1x5=5**

मञ्जूषा - अत्र ,जना:, मार्गे, अजा:, हरीतिमा, सुन्दरम्, कारयानं ,पर्वतेषु, धावति, राजमार्गे, अपि, दृश्यते , अनुगच्छति ,पर्वतवासिन:, गृहाणि, पर्वतीयस्थलम्



**अथवा**

**मंजूषायां प्रदत्तानां शब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पंच संस्कृतवाक्येषु एकम् अनुच्छेदं लिखत- “ हिमालयः ”**
**मंजूषा**
(हिमेन, उन्नतानि, आच्छादितानि, सर्वदा, शिखराणि, दिशि, वृक्षः, राजमुकुट इव, भारतस्य, शोभते, उतरस्यां)

**4 . अधोलिखितायां कथायां मञ्जूषायाः पदानि अवचित्य रिक्तस्थान पूर्तिः क्रियताम्- ½×10=5**

**मञ्जूषा –** मन्यमानाः, कुक्कुरा:, दूरम्,जम्बूक:, प्रत्यधावन्, समीपस्थम् ,नीलवर्णमनोहरम्, सायंकाले , स्थापिते , बहिः,
एकदा 1. -------------अहारार्थी कश्चित् 2. ----------------ग्रामं प्रविष्टः| तत्रत्या: 3.----------------जम्बूक दर्शनेन जातरोषा: हन्तुं तं 4. ------------------------ |सोऽपि प्राण रक्षणाय 5. ----------------- राजकगृहं प्रविष्टःतत्र 6. ---------------- नीलभाण्डे च पतित: अनन्तरं 7. ------------------- स्वशरीरं विलोक्य मुदितमना: शनैः8.-----------------------निष्क्रान्तः|विचित्रवर्णं तं अपूर्वं सत्त्वम् 9.--------------कुक्कुरा: अपि भयात् 10. -------------------- पलायत: |

**अथवा**

**मञ्जूषात: उपयुक्तपदानि गृहीत्वा अध्ययन विषये मातापुत्रयोःसंवादं पूरयतु- (1/2x10=5)**
**[मंजूषा- करिष्यामि, मित्रम्, पुत्र !, कृत्वा, क्रीडाक्षेत्रम्, गृहकार्यं, धन्यवाद:, गच्छामि, क्रिकेट्-प्रतियोगिता, क्रीड ]**

**संवादं-**

माता-(क)………………………… त्वम् कुत्र गच्छसि ?
पुत्रः – मातः, अहम्(ख) ………………………… गच्छामि।
माता – किं तव (ग)………………………… सम्पूर्णम् अस्ति ?
पुत्रः – यदा अहम् क्रीडाक्षेत्रात् आगमिष्यामि तदा (घ)…………………………|
माता – प्रतिदिनं तु गृहकार्यम् (ड) ………………………… खेलसि ।
पुत्रः – मातः, अद्य(च) ………………………… अस्ति ।
माता – पश्य, तव (छ)………………………… सुनीलः आगच्छति ।
पुत्रः – अहम् (ज)………………………… ।
माता – त्वम् धयायेन(झ) .................... |
पुत्र –(ञ) ....................... !

,

**खण्डः ग (25 अंकाः) अनुप्रयुक्त व्याकरणम्**

**5 अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिच्छेदं सन्धिं वा कृत्वा लिखत[4x1=4] (केवलं प्रश्नचतुष्ट्यम्**

**(**1) **स: +अपि**= ----------- मया सहगमिष्यति।
(i) स अपि (ii) सोऽपि (iii)सपि (iv) सोअपि

(2) वने **मृगाश्चरन्ति।**
(i) मृग+चरन्ति (ii) मृग+ओचरन्ति (iii) मृगा: + चरन्ति (iv)मृगों+चरति

(3) **जगदीश**:- -----+ -------- सर्वान् सर्वत्र रक्षति।
(i)जगद् +ईश: (ii)जगत + ईश: ( iii) जगत् +ईश: (iv) जग + दीश:

(4) **प्रत्येकम्** अयनस्य अवधिः षण्मासाः।
i) प्रत्ये+कम् (ii)प्रति + एकम् (iii) प्रत +एकम् (iv) प्रत्येक + म्

(5) पुरा भारते एक + छत्रम् ----------- राज्यं आसीत् |
I) एकचत्रं ii) एकछत्रम् iii) एकच्छत्रम् (iv) एकचछत्रम्

**6 अधोलिखित वाक्येषु रेखाकितपदानां समासं विग्रहं वा प्रदत्त विकल्पेभ्यः चित्वा लिखत (केवलं चतुष्ट्यम्)1x4=4**

(क) काकः **सक्रोधं** प्रविश्य कथयति ।
1 क्रोधेन सह 2 क्रोधेन सहितम् 3 क्रोधं कृत्वा

(ख) <u>**यथाशक्ति**</u> धनं यच्छतु ।
1 शक्ति सहितम् 2 शक्तेः योग्यम् 3 शक्तिम् अनतिक्रम्य
(ग) रामः <u>मृगस्य पश्चात</u> धावति स्म।
1 अनुमृगम् 2 मृगानुसारम् 3 समृगाम्
(घ) <u>सूपं करोति इति</u> मेषं ताडयति स्म |
1. सुपकार: 2. सूपकार: 3. सूपकर:
(ङ.) वानराणां <u>यूथस्य पति:</u> सर्वान् कपीन् अवदत् |
1.यूथप: 2. यूथस्यपति: 3. यूथपति:

7. **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति - प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्) 1 x 4 = 4**

**(** i ) <u>अवक्रता</u> यथा चित्ते तथा वाचि भवेद् यदि ।
(क) अवक्र+त्व (ख) अवक्र+ठक् (ग) अवक्र+टाप्
(घ) अवक्र +तल्
( ii ) <u>पाषाण +ङीप्</u> सभ्यता निसर्गे स्यान्न समाविष्टा।
(क) पाषाणी (ख) पाषाणा ( ग) पाषाणत्वं
(घ) पाषाणता
( iii ) सर्वेषामेव मत्कृते <u>महत्त्वं</u> विद्यते।
( क) महत्+त्व (ख) महत्+त्वम् ( ग ) महत्+मतुप्
(घ)महत्+ङीप्
( iv ) वाक्पटुः<u>धैर्य + मतुप्</u> मन्त्री सभायामप्यकातरः।
( क) स धैर्यवत्वं (ख) धैर्यवती (ग) धैर्यवन्तः (घ) धैर्यवान्
( v ) सर्वत्र <u>वेद + ठक्</u> जीवनं भवेत् ।
( क ) वैदिकः ( ख ) वैदिकी ( ग ) वैदिकाः ( घ ) वैदिकं

8. **अधोलिखितानां वाक्यानं वाच्यपरिवर्तनं कृत्वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत।**
**(केवलं प्रश्नत्रयम्) (1×3 =3)**
(i) मया पत्रं लिख्यते।
(क) अहं पत्रं लिखति (ख) अहम् पत्रम् लिखामि।
(ग) अहं पत्रं लिखसि (घ) अहं पत्रं लिखानि।
(ii) छायाकारः छायाचित्रं रचयति।
(क) छायाकारं रच्चयते। (ख) छायाकारं रच्चयते चित्रे।
(ग) छायाकारेण छायाचित्रं रच्यते। (घ) छायाकार: चित्र निर्माति।
(iii) जनाः प्रदर्शनीम् पश्यन्ति।
(क) जनैः दृश्यते। (ख) जनाभ्याम् प्रदर्शनी दृश्यते।
(ग) जनैः प्रदर्शनी दृश्यते। (घ) जनैः पश्यते

(iv) शिशुः पठति।

(क) शिशुना पठ्यते। (ख) शिशु पठ्यते ।

(ग) शिशवे पठ्यते। (घ) शिशू पठ्येते

9. **अधोलिखित - वाक्येषु रिक्तस्थानानि कालबोधकशब्दैः पूरयत - (केवलं प्रश्नचतुष्टयम्) (1x3=3)**

( i ) छात्राः सायं 5 : 15 ................... वादने विद्यालयात् गृहं गच्छन्ति

( ii ) अनन्तरं 07 : 00 .............. वादने क्रीडाक्षेत्रं गच्छन्ति ।

( iii ) तत्र क्रीडित्वा 06 : 30 .................... वादने गृहम् आगच्छन्ति ।

( iv ) गृहम् आगत्य 06 : 45 ................... वादने गृहकार्यं कुर्वन्ति ।

**10. अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः पूरयत।**

**(केवलं प्रश्नत्रयम्) (1/2 × 8= 4)**

**[मञ्जूषा :- सहसा , श्वः, उपरि, बहिः, ह्यः,अपि, तर्हि, , अद्य, ]**

(क)ग्रामाद्.............. देवालयः अस्ति।

(ख) .............. सोमवारः आसीत्।

(ग) ............... रविवारः भविष्यति।

(घ) वायुयानं ................ गच्छति।

(ड) मनुष्यः अनिच्छन् -------------- पापं करोति ।

(च)------------------ विदधीत् न क्रियाम्।

**(छ)** …………. मङ्गलवासरः अस्ति।

(ज) यदि मेघः गर्जति ………….. मयूराः नृत्यन्ति।

**11. अधोलिखितवाक्येषु रेखाङ्कित अशुद्धपदाय उचितं पदं चित्वा वाक्यानि पुनः लिखत।–**

(केवलं प्रश्नत्रयम्) (1 × 3 = 3)

(i) सः मम <u>मित्रः</u> अस्ति।

(क) मित्रेः (ख) मित्रम् (ग) मित्राणि

(घ) मित्रे

(ii) वृक्षे <u>चत्वारि</u> खगाः सन्ति।

(क) चतस्रः (ख) चत्वारि (ग) चत्वारः (घ) चित्राणि

(iii) त्वं ह्यः गृहं <u>गमिष्यसि</u> ।

(क) अगच्छत् (ख) अगच्छः (ग) अगच्छत

(घ) अगच्छम्

(iv) <u>अस्य</u> वृक्षे खगाः वसन्ति।

(क) अस्मिन् (ख) अस्याः (ग) द्वदम् (घ) अनेन

**घ खण्डः - पठितावबोधनम् 30 अङ्का:**

**12. अघोलिखितं गद्यांशं पठित्वाप्रदत्तप्रश्नानाम् उत्तराणि लिखत- 5**

गृहे तस्य भार्या सपदि समागतं पर्ति दृष्ट्वा अपृच्छत्-आर्य। किं सर्वगतं कुशलं वर्तते ? अयथाकालं समागतोसि। सम्प्रति धर्ममतिः सः पश्चात्तापेन दग्धमानसः सर्वं वत्तान्तं निवेद्य सकरुणम् उच्चैः अक्रन्दत्। बुद्धिमती सा अवदत्

अलं चिन्तया। आपदां तरणिः धैर्यम्। इदानीं विषादं व्यक्त्वा उद्यमः क्रियताम्।

(i) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)½×2=1

(अ) सर्वं वत्तान्तं निवेद्य सकरुणम् उच्चैः कोऽक्रन्दत्?

(आ) सः सर्व वृत्तान्तं निवेद्य कथं अक्रन्दत्?

(इ) आपदां किं तरणिः?

(ii) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)1×2=2

(अ) बुद्धिमती सा किं अवदत् ?

(आ) गृहं सपदि समागतं पतिं दृष्ट्या भार्या किमवदत्?

(इ) कीदृश: धर्ममति: उच्चै: अक्रन्दत्?

(iii) प्रदत्तविकल्पेभ्यः उचतम् उत्तरं चित्वा लिखत (केवलं प्रश्नद्वयम्)1×2=2

(अ) अपृच्छत् इति क्रियापदस्य कर्तृ पदं किं?

(क) प्रच्छन्नभाग्य: (ख) भार्या (ग) सम्प्रति(घ) स:

(आ) “सपदि”इति पदस्य पर्याय पदम् कि?

(क) झटिति (ख) समयः (ग) अवकाशः(घ) व्यय:

(इ)उद्यम: इति कर्तृ पदस्य क्रियापदं किम्?

(क) अपृच्छत् (ख) अक्रन्दत् (ग) क्रियताम्

**13.अधोलिखितं पद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत- 5**

प्रार्थितं ते मया चक्रं देवदानवपूजितम्।
अजेयः स्यामिति विभो! सत्यमेतद् ब्रवीमि ते॥

I. एकपदेन उत्तरत - 1/2x2=1

(i) चक्रं कीदृशं आसीत ?

(ii) कः अजेयः भवितुं इच्छति ?

II. पूर्णवाक्येन उत्तरत-1x2=2

(i) देवदानवपूजितं चक्रं कः अयाचत ?

(ii)द्रौणि: कस्मात् चक्रं अयाचत ?

III. निर्देशानुसारं शुद्धं उत्तरं प्रदत्त्विकल्पेभ्यः चित्वा लिखत- (1x2=2)

(i) ‘ मया” इति सर्वनाम पदम् कस्मै प्रयुक्तं ?

(अ) द्रौणि: (आ) कृष्ण : (इ) युद्धिष्ठिर : (ई) अर्जुन :

(ii) अस्मिन् श्लोके ‘पराजितः’ इत्यस्य विलोमपदं किम् ?

(अ) ब्रवीमि (आ) अजेयः (इ) स्याम (ई) प्रार्थितं

**14. अधोलिखितं नाट्य अंशं पठित्वा प्रदत्त प्रश्नानां उत्तराणि लिखत- 5**
सुधाकर: -अस्य प्रदेशस्य राजधानी का ?
पर्यटनाधिकारी- ईटानगरम् अस्य प्रदेशस्य राजधानी |
श्यामा –महोदय!अत्रत्यजंनजातीनाम् कानि प्रमुखानि आजीविका साधनानि ?
पर्यटनाधिकारी - कृषि:शिल्प कला वनम्सपद चैव एतेषां प्रमुखानि आजीविका साधनानि |
रवि: - मान्यवर !अस्य प्रदेशस्य प्रमुखा: उत्सवा: के ?
पर्यटनाधिकारी- साधु पृष्टम् | अत्र अनेके प्रमुखोत्सवा| "वांगचो" जनजातीनाम् प्रमुखं पर्वम् "ओरिया" इति अस्ति |एतत् तु फरवरी इति मासे मान्यते | अस्मिन् अवसरे कृषि भूमि पूजनम् सेतु निर्माणम् च सामाजिकम् कार्यम् क्रियते | "मोपीन" इति अपि कृषि पर्व अस्ति | देवानामपि देव: "मोपीन" इति कथ्यते | "होली" सदृशम् एव पर्वम् इदम् |जना:परस्परम् मुखे कपोले च शालिचूर्णम् लिम्पन्ति | इदम् अप्रैल इति मासे मान्यते | " ओणम्" पर्व समम् "साडकेन" एकम् अन्यत् पर्व अस्ति |लामासम्प्रदायस्य "लोसर" इति प्रमुखम् पर्वम् अपि "फरवरी" इति मासे सम्पद्यते |
हिमांशु:-अस्माभि: "मिथुन" इति विषये अपि किञ्चित् श्रुतम् | किम् तत् ?
पर्यटनाधिकारी-"मिथुन" गोमहिषसदृश: एक: विशिष्ट: राजपशु: अस्ति |

1) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) (½x2=1)

I . "लोसर" कस्य प्रमुखं पर्वम् ?
Ii . कृषि भूमि पूजनम् कस्मिन् पर्वणि क्रियते ?
Iii. अरुणाचलस्य विशिष्ट: राजपशु : क: ?

आ) एकवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) (1x2=2)

I. जनजातीनाम् प्रमुखानि आजीविका साधनानि कानि ?
Ii. "ओरिया" इति केषाम् प्रमुखं पर्वम् ?
Iii. "मोपीन" इति कीदृशम् पर्व अस्ति ?

इ) उचितम् उत्तरम् लिखत -(केवलं प्रश्नद्वयम्) (1x2=2)

I लिम्पन्ति क्रियाया: कर्तृपदम् किम् ?
Ii. प्रमुखम् पर्वम् इत्यनयो: पदयो: विशेषण पदम् किम् ?
Iii. प्रमुखम् पर्वम् अपि "फरवरी" इति मासे सम्पद्यते | अत्र अव्यय: क: शब्द:?

**15. अधोलिखितवाक्येषु स्थूलपदम् आधृत्य प्रश्ननिर्माणं कुरुत-(1x5=5)**
(क) नेपथ्ये काकध्वनिः श्रूयते ।
(ख) काकः प्रभाते 'का का' ध्वनिना सुप्तान् प्रबोधयति ।
(ग) मयूरस्य पिच्छानां सौन्दर्यम् अद्भुतम् अस्ति।
(घ) मयूरस्य नृत्यं प्रकृतेः आराधना ।
(ङ)ज्वलन् मेष: अश्वशालां प्रविशति |

**16. अधोलिखितश्लोकस्य अन्वयं पूरयित्वा पुनः लिखत – (1/x4=2 )**
चञ्चलं हि मनः कृष्ण: प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।।
मञ्जूषा : ( वायोः , तस्य , दृढम् , कृष्ण! )
अन्वय: - (i)......................... मनः हि चञ्चलं , बलवद् ( ii )
....................... प्रमाथि। अहं( iii ) .................... निग्रहं (iv)
........................ इव सुदष्करम् मन्ये।
अथवा
परमापद्गतेनापि नैव तात त्वया रणे।
इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषत:॥
अन्वय- तात ! परम (i) ............... अपि (ii)त्वया---------- विशेषतः
(iii)--------------- इदम्(iv) ---------------- नैव प्रयोक्तव्यं।
मंजूषा ( मानुषेषु, आपद्गतेन, अस्त्रम्, रणे)

**17. अधोलिखितवाक्येषु स्थूलाक्षरपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत(1x4 =4)**
(क) य इच्छत्यात्मनः <u>श्रेयः</u> प्रभूतानि सुखानि च।
(i) श्रेष्ठः (ii) कल्याणम् (iii) सम्पत्तिम्
ख) तदैव <u>आहुः</u> महात्मानः समत्वमिति तथ्यतः।
(i) कथयन्ति (ii) शृण्वन्ति (iii) चिन्तयन्ति
(ग) <u>वाक्पटुः</u> धैर्यवान् मन्त्री सभायामप्यकातरः परैः न परिभूयते।
(i) निपुणः (ii) उत्तमः श्रोता (iii) वाक्कुशलः
(घ) त्यक्त्वा धर्मप्रदां वाचं <u>परुषां</u> योऽभ्युदीरयेत्।
(i) कठोराम् (ii) कोमलाम् (iii) प्रयुक्ताम

**18. अधोलिखित-कथां रिक्तस्थानानि पूरयित्वा पुनः लिखत - ½×8=4**
कस्मिंश्चित् (i) ………….चन्द्रो नाम भूपतिः प्रतिवसति स्म। तस्य (ii)............. वानर-क्रीडारताः वानरयूथं नित्यमेव विविधैः भोज्यपदार्थैः पुष्टिं नयन्ति स्म। (iii) ……….राजगृहे बालवाहनयोग्यं मेषयूथम् आसीत्। तेषां
(iv)……… मध्ये एको मेष: जिह्वालोलुपतया अहर्निश महानसं प्रविश्य यत् पश्यति तद् भक्षयति। ते च सूपकाराः यत्किञ्चित् काष्ठं, मृण्मयं (v) ………कांस्यताम्रपात्रं वा पश्यन्ति तेन तम् आशु ताडयन्ति स्म।मेषस्य सूपकाराणां च(vi)……… अवेक्ष्य नीतिविदाम् अग्रणीः वानरयूथपतिः अचिन्तयत् - एतेषां कलहो न (vii)……… हिताय। एवं विचार्य स यूथपः सर्वान् कपीन् आहूय रहसि अवदत्-सूपकाराणां मेषेण सह एषः कलह: नूनं (viii)-
……… विनाशकारणं भविष्यति।

मञ्जूषा – (भाजन, नगरे, भवतां, तस्मिन्, मेषाणां, पुत्राः, कलहम्,)

XXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXX XXXXXXXX